# पेरि-सूर्यनारायणशास्त्रिकृत-नागेशभावप्रकाशदिशा
# वैयाकरणसिद्धान्तलघुमञ्जूषास्थ-प्रातिपदिकार्थविमर्शः

*(Peri-sūryanārāyaṇaśāstrikṛta-nāgeśabhāvaprakāśadiśā*
*vaiyākaraṇasiddhāntalaghumañjūṣāstha-prātipadikārthavimarśaḥ)*
A critical analysis of prātipadikārtha of vaiyākaraṇasiddhāntalaghumañjūṣāyā
through nāgeśabhāvaprakāśadiśā of Peri-sūryanārāyaṇaśāstrī

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृते पि-एच्-डि (PhD)
इत्युपाधिप्राप्तये समर्प्यमाणो शोधप्रबन्धः


अनुसन्धाता– उत्तमघोषः
अनुक्रमाङ्कः – B2050010
शोधच्छात्रः,संस्कृतदर्शनविभागे
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

मार्गदर्शकः –डॉ. गोपीकृष्णन्-रघुः
अध्यापकः
संस्कृतदर्शनविभागे
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य



रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठः,हावडा – ७११२०२
शिक्षावर्षम् – २०२०-२०२५

# पेरि-सूर्यनारायणशास्त्रिकृत-नागेशभावप्रकाशदिशा वैयाकरणसिद्धान्तलघुमञ्जूषास्थ-प्रातिपदिकार्थविमर्शः

(A critical analysis of prātipadikārtha of vaiyākaraṇasiddhāntalaghumañjūṣāyā through nāgeśabhāvaprakāśadiśā of Peri-sūryanārāyaṇaśāstrī)

## शोधसारः


वैयाकरणसिद्धान्तलघुमञ्जूषाया गूढार्थबोधः टीकां विना दुश्शकः। मञ्जूषायाष्टीकासु श्रीबालम्भट्टविरचिता कला दुर्बलाचार्यविरचिता कुञ्चिका एव प्रसिद्धा। तत्रापि समग्रग्रन्थोपरि केवलं कलैवोपलभ्यते। केवलं कलाकुञ्चिके आश्रित्य मञ्जूषस्थविषयाणां यथार्थबोधे क्लेशमनुभवद्भिः सभापतिशर्मोपाध्यायैः तात्पर्यनिरूपणान्तभागपर्यन्तं रत्नप्रभानाम्नी विस्तृतटीका विरचिता। तदूर्ध्वविषया अधुनापि अस्पृष्टाः केनापि, बोद्धुं क्लिष्टत्वात् क्रमशोऽध्ययनपरम्पराच्युतप्राया इति मन्वानाः पेरिसूर्यनारायणशास्त्रिणः नागेशभावप्रकाशनामिकामिमामन्वर्थनाम्नीं टीकां व्यरचयन्। मञ्जूषास्थविषयेषु प्रातिपदिकार्थविचारः क्लिष्टतरोऽतस्तदंशे बोद्धारो बोधयितारश्चाङ्गुलीगण्या इत्यस्मिन् शोधप्रबन्धे नागेशभावप्रकाशसाहाय्येन तदंशस्योद्घाटनं क्रियते।

नागेशभावप्रकाशे न केवलं मञ्जूषास्थपङ्क्तीनां व्याख्यानमपि तु तत्तद्विषयेषु शास्त्रान्तरमतमपि विवेचनपूर्वकं विशदीकृतम्। शोधप्रबन्धेऽस्मिन् मया दुर्बोध्यनागेशपङ्क्तीनामर्थबोधनाय पूर्वं शास्त्रान्तरमतं पर्यालोच्य तदनु तत्र नागेशाभिप्रायः स्पष्टीकृतः। तत्तद्विशिष्टविषयेषु आचार्यान्तरात् नागेशमतस्य पार्थक्ये बीजं विचिन्त्य सकारणं निष्कर्ष उपन्यस्तम्।

शोधप्रबन्धेऽस्मिन् उपक्रमोपसंहाराभ्यां पञ्च अध्यायास्सन्ति। उपक्रमे तावत् मञ्जूषाया उपलब्धाष्टीकाष्टीकाकर्तृविषये च वैशद्येनालोचितम्। तदनु प्रातिपदिकार्थविषये संक्षेपेण कौमुदीभूषणसारादीनां मतं प्रस्तुतम्। प्रथमाध्याये जातिशक्तिवादं व्यक्तिशक्तिवादञ्चोपस्थाप्य पाणिनेरुभयसमर्थनं प्रमाणेन दृढीकृतम्। लोकव्यवहारात् व्यक्तिशक्तिवादं प्रतिपाद्य शक्तिग्राहकाः सन्निकर्षाश्च विस्तारेण व्याख्याताः। द्वितीयाध्याये द्रव्यशक्तिवादे द्रव्यलक्षणमाश्रित्य विशिष्टो विचारः कृतः। वाक्यपदीयनिरुक्तादीनां द्रव्यलक्षणं विविच्य शाब्दिकानां राद्धान्तो विमृष्टः। गुणसमुदायद्रव्ययोर्भेदाभेदपक्षमुपवर्ण्य जातिव्यक्त्याकृत्यादीनां कदा कस्य प्राधान्यमिति विवृतम्। तृतीयाध्याये शुद्धद्रव्यशक्तिवादमुक्त्वा लिङ्गस्य प्रातिपदिकार्थत्वं निरूपितम्। तत्र लिङ्गस्य शास्त्रीयं लक्षणमुपवर्ण्य तस्य शब्दनिष्ठत्वमुतार्थनिष्ठत्वमिति सप्रमाणं व्याख्यातम्। चतुर्थाध्याये संख्याकारकशब्दानां प्रातिपदिकार्थत्वं निरूप्यानुकार्यानुकरणयोर्भेदाभेदपक्ष उपस्थापितः। पञ्चमाध्याये सर्व-तद्-स्व-एक-धेन्वादीनां शब्दानां प्रवृत्तिनिमित्तं सयुक्ति निर्धारितम्। उपसंहारे च विषयसंक्षेपो न्यस्तः। परिशिष्टभागे च उद्धृतश्लोकानाम् उद्धृतसूत्राणां परिशीलितग्रन्थानाञ्चावलिः प्रदत्ता।